श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.18 - ચતુર્થ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(વ઼ઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

શ્રીમદ્ભાગવતમહાપુરાણમ્
એકાદશઃ સ્કન્ધઃ
..અથ અષ્ટાદશોઽધ્યાયઃ - ૧૮ ..

### શ્રીભગવાનુવાચ

વનં(વઁ) વિવિક્ષુઃ(ફ્) પુત્રેષુ, ભાર્યાં(ન્) ન્યસ્ય સહૈવ વા .
વન એવ વસેચ્છાન્તસ્- તૃતીયં(મ્) ભાગમાયુષઃ .. ૧..

વસેય્ + છાન્ + તસ્

કન્દમૂલફલૈર્વન્યૈર્ - મેધ્યૈર્વૃત્તિં(મ્) પ્રકલ્પયેત્ .
વસીત વલ્કલં(વઁ) વાસસ્ - તૃણપર્ણાજિનાનિ ચ .. ૨..

કન્દમૂલ + ફલૈર્ + વન્યૈર્ ,મેધ્યૈર્ + વૃત્તિં

તૃણ + પર્ણા + જિનાનિ

કેશરોમનખશ્મશ્રુ - મલાનિ બિભૃયાદ્ દતઃ .

ન ધાવેદપ્સુ મજ્જેત, ત્રિકાલં(મ્) સ્થણ્ડિલેશયઃ .. ૩..

કેશરો + મનખશ્ + મશ્રુ

ગ્રીષ્મે તપ્યેત પં(ઞ્)ચાગ્નીન્, વર્ષાસ્વાસારષાડ્જલે .

આકણ્ઠમગ્નઃ(શ્) શિશિરે, એવં(વઁ) વૃત્તસ્તપશ્ચરેત્ .. ૪..

પં(ઞ્) + ચાગ્ + નીન્,

વર્ષાસ્ + વાસા + રષાડ્ + જલે

એવં(વ્) + વૃત્તસ્ + તપશ્ + ચરેત્

અગ્નિપક્વં(મ્) સમશ્નીયાત્, કાલપક્વમથાપિ વા .

ઉલૂખલાશ્મકુટ્ટો વા, દન્તોલૂખલ એવ વા .. ૫..

સમશ્ + નીયાત્ ,

ઉલૂખલાશ્ + મકુટ્ + ટો

સ્વયં(મ્) સં(ઞ્) ચિનુયાત્ સર્વ-માત્મનો વૃત્તિકારણમ્ .

દેશકાલબલાભિજ્ઞો, નાદદીતાન્યદાઽઽહૃતમ્ .. ૬..

નાદદીતાન્ + યદાઽઽહૃતમ્

વન્યૈશ્ચરુપુરોડાશૈર્- નિર્વપેત્ કાલચોદિતાન્ .

ન તુ શ્રૌતેન પશુના, માં(યઁ) યજેત વનાશ્રમી .. ૭..

વન્યૈશ્ + ચરુપુરો + ડાશૈર્ ,

કાલચો + દિતાન્

અગ્નિહોત્રં(ઞ્) ચ દર્શશ્ચ, પૂર્ણમાસશ્ચ પૂર્વવત્ .

ચાતુર્માસ્યાનિ ચ મુને- રામ્નાતાનિ ચ નૈગમૈઃ .. ૮..

ચાતુર્ + માસ્યાનિ , રામ્ + નાતાનિ

એવં(ઞ્) ચીર્ણેન તપસા, મુનિર્ધમનિસન્તતઃ .

માં(ન્) તપોમયમારાધ્ય, ઋષિલોકાદુપૈતિ મામ્ .. ૯..

મુનિર્ + ધમ + નિસન્ + તતઃ

યસ્ત્વેતત્ કૃચ્છ્રતશ્ચીર્ણં(ન્), તપો નિઃશ્રેયસં(મ્) મહત્ .
કામાયાલ્પીયસે યુઞ્જ્યાદ્, બાલિશઃ(ખ્) કોઽપરસ્તતઃ .. ૧૦..

યસ્ + ત્વેતત્ , કૃચ્છ્ર + તશ્ + ચીર્ણં

યદાસૌ નિયમેઽકલ્પો, જરયા જાતવેપથુઃ .
આત્મન્યગ્નીન્ સમારોપ્ય, મચ્ચિત્તોઽગ્નિં(મ્) સમાવિશેત્ .. ૧૧..

આત્મન્ + યગ્ + નીન્

યદા કર્મવિપાકેષુ, લોકેષુ નિરયાત્મસુ .
વિરાગો જાયતે સમ્યઙ્, ન્યસ્તાગ્નિઃ(ફ્) પ્રવ્રજેત્તતઃ .. ૧૨..

પ્રવ્રજેત્ + તતઃ

ઇષ્ટ્વા યથોપદેશં(મ્) માં(ન્), દત્ત્વા સર્વસ્વમૃત્વિજે .
અગ્નીન્ સ્વપ્રાણ આવેશ્ય, નિરપેક્ષઃ(ફ્) પરિવ્રજેત્ .. ૧૩..

સર્વસ્વ + મૃત્વિજે

વિપ્રસ્ય વૈ સં(ન્)ન્યસતો, દેવા દારાદિરૂપિણઃ .
વિઘ્નાન્ કુર્વન્ત્યયં(મ્) હ્યસ્મા-નાક્રમ્ય સમિયાત્ પરમ્ .. ૧૪..

કુર્વન્ + ત્યયં(મ્)

બિભૃયાચ્ચેન્મુનિર્વાસઃ(ખ્), કૌપીનાચ્છાદનં(મ્) પરમ્ .
ત્યક્તં(ન્) ન દણ્ડપાત્રાભ્યા-મન્યત્ કિં(ઞ્) ચિદનાપદિ .. ૧૫..

બિભૃયાચ્ + ચેન્મુનિર્ + વાસઃ(ખ્)

દૃષ્ટિપૂતં(ન્) ન્યસેત્ પાદં(વઁ), વસ્ત્રપૂતં(મ્) પિબેજ્જલમ્ .
સત્યપૂતાં(વઁ) વદેદ્ વાચં(મ્), મનઃ(ફ્)પૂતં(મ્) સમાચરેત્ .. ૧૬..

પિબેજ્ + જલમ્

મૌનાનીહાનિલાયામા, દણ્ડા વાગ્દેહચેતસામ્ .
ન હ્યેતે યસ્ય સન્ત્યં(ઙ્)ગ, વેણુભિર્ન ભવેદ્ યતિઃ .. ૧૭..

મૌનાની + હાનિલા + યામા , સન્ + ત્યં(ઙ્)ગ

ભિક્ષાં(ગ્) ચતુર્ષુ વર્ણેષુ, વિગર્હ્યાન્ વર્જયં(મ્)શ્ચરેત્ .

સપ્તાગારાનસં(ઙ્)ક્લૃપ્તાં(મ્)સ્-તુષ્યેલ્લબ્ધેન તાવતા .. ૧૮..

વિગર્ + હ્યાન્ , સપ્તાગારા + નસં(ઙ્)ક્લૃપ્ + તાં(મ્)સ્

તુષ્યેલ્ + લબ્ + ધેન

બહિર્જલાશયં(ઙ્) ગત્વા, તત્રોપસ્પૃશ્ય વાગ્યતઃ .

વિભજ્ય પાવિતં(મ્) શેષં(મ્) ભું(ગ્)જીતાશેષમાહૃતમ્ .. ૧૯..

તત્રોપસ્ + પૃશ્ય, ભું(ગ્)જીતા + શેષમા + હૃતમ્

એકશ્ચરેન્મહીમેતાં(ન્) નિઃ(સ્)સં(ઙ્)ગઃ(સ્) સં(યઁ)યતેન્દ્રિયઃ .

આત્મક્રીડ આત્મરત, આત્મવાન્ સમદર્શનઃ .. ૨૦..

એકશ્ +ચરેન્ + મહીમેતાં

વિવિક્તક્ષેમશરણો, મદ્ભાવવિમલાશયઃ .

આત્માનં(ગ્) ચિન્તયેદેક-મભેદેન મયા મુનિઃ .. ૨૧..

વિવિક્તક્ષે + મશરણો

અન્વીક્ષેતાત્મનો બન્ધં(મ્), મોક્ષં(ગ્) ચ જ્ઞાનનિષ્ઠયા .

બન્ધ ઇન્દ્રિયવિક્ષેપો, મોક્ષ એષાં(ગ્) ચ સં(યઁ)યમઃ .. ૨૨..

અન્વીક્ષે + તાત્મનો

તસ્માન્નિયમ્ય ષડ્વર્ગં(મ્), મદ્ભાવેન ચરેન્મુનિઃ .

વિરક્તઃ(હ) ક્ષુલ્લકામેભ્યો, લબ્ધ્વાઽઽત્મનિ સુખં(મ્) મહત્ .. ૨૩..

તસ્માન્ + નિયમ્ય

પુરગ્રામવ્રજાન્ સાર્થાન્, ભિક્ષાર્થં(મ્) પ્રવિશં(વઁ)શ્ચરેત્ .

પુણ્યદેશસરિચ્છૈલ-વનાશ્રમતીં(મ્) મહીમ્ .. ૨૪..

પુણ્યદેશ + સરિચ્ + છૈલ

વાનપ્રસ્થાશ્રમપદેષ્-વભીક્ષ્ણં(મ્) ભૈક્ષ્યમાચરેત્ .

સં(મ્)સિધ્યત્યાશ્વસં(મ્)મોહઃ(શ્)શુદ્ધસત્ત્વઃ(શ્) શિલાન્ધસા .. ૨૫..

વાનપ્રસ્થા + શ્રમપદેષ્ ,સં(મ્)સિધ્યત્ + યાશ્ + વસં(મ્)મોહઃ(શ્)

નૈતદ્ વસ્તુતયા પશ્યેદ્, દૃશ્યમાનં(વ઼્) વિનશ્યતિ .

અસક્તચિત્તો વિરમે-દિહામુત્ર ચિકીર્ષિતાત્ .. ૨૬..

ચિકીર્ + ષિતાત્

યદેતદાત્મનિ જગન્- મનોવાક્પ્રાણસં(મ્)હતમ્ .

સર્વં(મ્) માયેતિ તર્કેણ, સ્વસ્થસ્ત્યક્ત્વા ન તત્ સ્મરેત્ .. ૨૭..

યદે + તદાત્મનિ, મનોવાક્ + પ્રાણ + સં(મ્)હતમ્

સ્વસ્થસ્ + ત્યક્ત્વા

જ્ઞાનનિષ્ઠો વિરક્તો વા, મદ્ભક્તો વાનપેક્ષકઃ .

સલિં(ઙ્)ગાનાશ્રમાં(મ્)સ્ત્યક્ત્વા, ચરેદવિધિગોચરઃ .. ૨૮..

સલિં(ઙ્)ગાના + શ્રમાં(મ્)સ્ + ત્યક્ત્વા

બુધો બાલકવત્ ક્રીડેત્, કુશલો જડવચ્ચરેત્ .

વદેદુન્મત્તવદ્ વિદ્વાન્, ગોચર્યાં(ન્) નૈગમશ્ચરેત્ .. ૨૯..

વદેદુન્ + મત્ + તવદ્

વેદવાદરતો ન સ્યાન્- ન  પાખણ્ડી ન હૈતુકઃ .

શુષ્કવાદવિવાદે ન, કં(ઞ્)ચિત્ પક્ષં(મ્) સમાશ્રયેત્ .. ૩૦..

શુષ્કવા + દવિવાદે

નોદ્વિજેત જનાદ્ ધીરો, જનં(ઞ્) ચોદ્વેજયેન્ન તુ .

અતિવાદાં(મ્)સ્તિતિક્ષેત, નાવમન્યેત કં(ઞ્)ચન .

દેહમુદ્દિશ્ય પશુવદ્, વૈરં(ઙ્) કુર્યાન્ન કેનચિત્ .. ૩૧..

ચોદ્ + વેજયેન્ + ન

અતિવાદાં(મ્)સ્ + તિતિક્ષેત

એક એવ પરો હ્યાત્મા, ભૂતેષ્વાત્મન્યવસ્થિતઃ .

યથેન્દુરુદપાત્રેષુ, ભૂતાન્યેકાત્મકાનિ ચ .. ૩૨..

ભૂતેષ્વાત્ + મન્ય + વસ્થિતઃ, યથેન્ + દુરુ + દપાત્રેષુ

ભૂતાન્યે + કાત્ + મકાનિ

અલબ્ધ્વા ન વિષીદેત, કાલે કાલેઽશનં(ઙ્) ક્વચિત્ .

લબ્ધ્વા ન હૃષ્યેદ્ ધૃતિમા-નુભયં(ન્) દૈવતન્ત્રિતમ્ .. ૩૩..

દૈવતન્ + ત્રિતમ્

આહારાર્થં(મ્) સમીહેત, યુક્તં(ન્) તત્ પ્રાણધારણમ્ .

તત્ત્વં(વ્ઁ) વિમૃશ્યતે તેન, તદ્ વિજ્ઞાય વિમુચ્યતે .. ૩૪..

યદૃચ્છયોપપન્નાન્ન- મદ્યાચ્છ્રેષ્ઠમુતાપરમ્ .

તથા વાસસ્તથા શય્યાં(મ્), પ્રાપ્તં(મ્)પ્રાપ્તં(મ્) ભજેન્મુનિઃ .. ૩૫..

યદૃચ્છયો + પપન્ + નાન્ + ન, મદ્યાચ્ + છ્રેષ્ઠ + મુતાપરમ્

શૌચમાચમનં(મ્) સ્નાનં(ન્), ન તુ ચોદનયા ચરેત્ .

અન્યાં(મ્)શ્ચ નિયમાન્ જ્ઞાની, યથાહં(લ્ઁ) લીલયેશ્વરઃ .. ૩૬..

શૌચમા + ચમનં(મ્)

ન હિ તસ્ય વિકલ્પાખ્યા, યા ચ મદ્વીક્ષયા હતા .

આદેહાન્તાત્ ક્વચિત્ ખ્યાતિસ્-તતઃ(સ્) સમ્પદ્યતે મયા .. ૩૭..

મદ્ + વિક્ષયા, આદેહાન્ + તાત્

દુઃખોદર્કેષુ કામેષુ, જાતનિર્વેદ આત્મવાન્ .

અજિજ્ઞાસિતમદ્ધર્મો, ગુરું(મ્) મુનિમુપવ્રજેત્ .. ૩૮..

અજિજ્ઞા + સિતમદ્ + ધર્મો

તાવત્ પરિચરેદ્ ભક્તઃ(શ્), શ્રદ્ધાવાનનસૂયકઃ .

યાવદ્ બ્રહ્મ વિજાનીયાન્ - મામેવ ગુરુમાદૃતઃ .. ૩૯..

શ્રદ્ધાવા + નનસૂયકઃ

યસ્ત્વસં(યઁ)યતષડ્વર્ગઃ(ફ્), પ્રચણ્ડેન્દ્રિયસારથિઃ .

જ્ઞાનવૈરાગ્યરહિતસ્ત્- ત્રિદણ્ડમુપજીવતિ .. ૪૦..

યસ્ત્વ + સં(યઁ)યત + ષડ્વર્ગઃ(ફ્),પ્રચણ્ડેન્ + દ્રિય + સારથિઃ

ત્રિદણ્ડ + મુપ + જીવતિ

સુરાનાત્માનમાત્મસ્થં(ન્), નિહ્નુતે માં(ઞ્)ચ ધર્મહા .
અવિપક્વકષાયોઽસ્મા-દમુષ્માચ્ચ વિહીયતે .. ૪૧..

સુરાનાત્મા + નમાત્ + મસ્થં(ન્),

અવિપક્ + વકષા + યોઽસ્મા

ભિક્ષોર્ધર્મઃ(શ્) શમોઽહિં(મ્)સા, તપ ઈક્ષા વનૌકસઃ .
ગૃહિણો ભૂતરક્ષેજ્યા, દ્વિજસ્યાચાર્યસેવનમ્ .. ૪૨..

ભિક્ષોર્ + ધર્મઃ(શ્),ભૂત + રક્ષેજ્યા

દ્વિજસ્ + યાચાર્ + યસેવનમ્

બ્રહ્મચર્યં(ન્)તપઃ(શ્) શૌચં(મ્), સન્તોષો ભૂતસૌહૃદમ્ .
ગૃહસ્થસ્યાપ્યૃતૌ ગન્તુઃ(સ્), સર્વેષાં(મ્) મદુપાસનમ્ .. ૪૩..

ગૃહસ્થસ્ + યાપ્ + યૃતૌ

ઇતિ માં(યઁ) યઃ(સ્) સ્વધર્મેણ, ભજન્ નિત્યમનન્યભાક્ .
સર્વભૂતેષુ મદ્ભાવો, મદ્ભક્તિં(વઁ) વિન્દતે દૃઢામ્ .. ૪૪..

નિત્ય + મનન્ય + ભાક્

ભક્ત્યોદ્ધવાનપાયિન્યા, સર્વલોકમહેશ્વરમ્ .
સર્વોત્પત્ત્યપ્યયં(મ્) બ્રહ્મ, કારણં(મ્) મોપયાતિ સઃ .. ૪૫..

ભક્ત્યોદ્ + ધવા + નપાયિન્યા

સર્વોત્ + પત્ત્યપ્ + યયં

ઇતિ સ્વધર્મનિર્ણિક્ત-સત્ત્વો નિર્જ્ઞાતમદ્ગતિઃ .
જ્ઞાનવિજ્ઞાનસમ્પન્નો, નચિરાત્ સમુપૈતિ મામ્ .. ૪૬..

સ્વધર્મ + નિર્ણિક્ત, નિર્જ્ઞા + તમદ્ + ગતિઃ

જ્ઞાનવિજ્ઞા + નસમ્પન્નો

વર્ણાશ્રમવતાં(ન્) ધર્મ, એષ આચારલક્ષણઃ .
સ એવ મદ્ભક્તિયુતો, નિઃ(શ્)શ્રેયસકરઃ(ફ્) પરઃ .. ૪૭..

વર્ણાશ્ર + મવતાં(ન્) ,આચા + રલક્ષણઃ

એતત્તેડભિહિતં(મ્) સાધો, ભવાન્ પૃચ્છતિ યચ્ચ મામ્ .
યથા સ્વધર્મસં(યઁ)યુક્તો, ભક્તો માં(મ્) સમિયાત્ પરમ્ .. ૪૮..

એતત્ + તેડભિહિતં(મ્)

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)
સં(મ્)હિતાયાં(મ્) એકાદશસ્કન્ધે અષ્ટાદશોડધ્યાયઃ .. ૧૮..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ.

